shrIvenkaTeshastotram

શ્રીવેઙ્કટેશસ્તોત્રમ્

Document Information

Text title : shrIveMkaTeshastotram 3

File name : veMkaTeshastotram.itx

Category : vishhnu, venkateshwara, stotra, vishnu

Location : doc_vishhnu

Author : vIrarAghavAchArye

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Description-comments : with shrIpadmAvatIstotra

Source : Venkatesha Kavyakalapa

Latest update : May 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

sanskritdocuments.org

શ્રીવેઙ્કટેશસ્તોત્રમ્

શ્રિયા પરિષ્કૃતોરસ્કં દયામય શુભાકૃતિમ્ ।
શ્રીવેઙ્કટશિખારત્નં શ્રીનિવાસં ભજામહે ॥ ૧॥

સતે વૈકુણ્ઠખણ્ડેઽસ્મિન્નનન્તાશ્ચર્યવૈભવે ।
સુલભાય નમઃ પુંસે દુર્લભાત્મસમાય નઃ ॥ ૨॥

અઞ્જનાદ્રિશિરસ્યાત્તવ્યઞ્જનાયાઞ્જનચ્છિદે ।
અઞ્જનાભાય શુદ્ધાય રઞ્જનાયાત્મને નમઃ ॥ ૩॥

અવ્યક્તાય સુસૂક્ષ્માય સ્વયંવ્યક્તાય ભાસ્વતે ।
વૃષભાદ્રિવિનોદાય વિશુદ્ધજ્યોતિષે નમઃ ॥ ૪॥

તસ્મૈ પરસ્મૈ કસ્મૈચિત્પુંસે સંસેવિતાઙ્ઘ્રયે ।
સુરાસુરનરૈર્મુક્તૈરિવ નિત્યશ્રિયે નમઃ ॥ ૫॥

અદ્રીકૃતમહાતલ્પમવિકલ્પદયાનિધિમ્ ।
આશ્રિતપ્રાર્થનાકલ્પમાકલ્પયતુ મે મનઃ ॥ ૬॥

અખર્વપૂર્વદેવાદિગર્વસર્વઙ્કુષૌજસે ।
નમઃ શ્રીશાય શર્વાદિસુપર્વસ્તુતપર્વણે ॥ ૭॥

ઉત્તુઙ્ગાચલશૃઙ્ગસ્થો દયારઙ્ગૈરપાઙ્ગિતૈઃ ।
સમાનપિ સમાન્પશ્યન્ જન્તૂન્ મન્તૂન્ક્ષિપેત્સ નઃ ॥ ૮॥

આકૃષ્ય ભવિનો વ્યાજૈઃ આધિવ્યાધ્યેકભેષજમ્ ।
અનુભાવયતે રૂપં નિધયે શ્રીશ્રિયૈ નમઃ ॥ ૯॥

નિત્યશ્રીવાસનિર્દુષ્ટહૃદયાય દયાત્મને ।
નિખિલાનુગ્રહૈકાર્થવિગ્રહાય નમોઽસ્તુ નઃ ॥ ૧૦॥

અર્ચિતાય નમો દિવ્યૈસ્સુમનોભિસ્સુગન્ધયે ।
વિબુધામૃતદાયાસ્તુ વૃષભાદ્રિવિશોભિને ॥ ૧૧॥

ઘનપત્રલસિમ્હાદ્રિવનચ્છાયેન વર્ષ્મણા ।
ઘનાઘનસમાનેન જનતાપચ્છિદે નમઃ ॥ ૧૨॥

નાનાશાખોપપન્નાય સુપર્ણોદ્ભાસિતાત્મને ।
નિશ્શેષફલદાયાસ્તુ નમઃ કલ્પદ્રુમાય નઃ ॥ ૧૩॥

યામુનાધ્વગતોદ્બોધસુમનસ્સંસ્તુતાત્મને ।
નિત્યગોપજનેષ્ટાય ગોવિન્દાય નમોઽસ્તુ નઃ ॥ ૧૪॥

બાલોપચ્છન્દનન્યાયકૃતવિશ્વહિતં પરમ્ ।
અવતીર્ણં પ્રભું તીર્ણક્લેશં કારણમાશ્રયે ॥ ૧૫॥

કપ્યાસકઞ્જનેત્રાય નમઃ કલ્મષહારિણે ।
મનઃપ્રગ્રહરુદ્ધાક્ષવશીકાર્યાય વિષ્ણવે ॥ ૧૬॥

પ્રશસ્તનાગપૃષ્ટેઽસ્મિન્નાકપૃષ્ઠ ઇવ સ્થિતમ્ ।
નિત્યસૂર્યાશ્રયં ધામ જગત્સવિતૃ તન્નુમઃ ॥ ૧૭॥

અપારવિભવાનેકતીર્થે દિવ્યે વૃષાચલે ।
મધ્યલોકમહારત્ને વસતે વિષ્ણવે નમઃ ॥ ૧૮॥

આનન્દનિલયખ્યાતવિમાનાન્તર્વિભૂષણમ્ ।
અશેષેશ્વરમાનન્દમયં બ્રહ્મ પરં સ્તુમઃ ॥ ૧૯॥

સેવે તૌ દમ્પતી દિવ્યૌ યાવેનાંસિ ભવાર્દિતાન્ ।
હરાવઃ પ્રણિપાત્યેતિ વરાહક્ષેત્રમાશ્રિતૌ ॥ ૨૦॥

પ્રણિપાત્યાનુગૃહ્યાપિ પદ્મયા પ્રેષિતાન્ જનાન્ ।
પ્રપાદ્ય પરમાનન્દે મજ્જયિત્રે નમો નમઃ ॥ ૨૧॥

સપ્તપર્વતસોપાનસમારોહશ્રમૈર્ભવાન્ ।
અઘાનિ ફલયન્ શ્રીશ સ્વાત્મસાત્કુરુતે શ્રિતાન્ ॥ ૨૨॥

આરુહ્ય પર્વતાનુચ્ચૈઃ અધઃસ્થાન્ વીક્ષ્ય સાધવઃ ।
ભક્તાભક્તાન્તરં શ્રીમન્નેતાવદિતિ મન્વતે ॥ ૨૩॥

યં ત્વાં મુક્તામયાકલ્પં સદા મુક્તામયાઃ શ્રિતાઃ ।
મુક્તા મયાપિ પાપ્માનઃ યેન શ્રીનાથ તે નમઃ ॥ ૨૪॥

અદૃષ્ટશ્રીનિવાસાનામશ્રિતાહીન્દ્રભૂભૃતામ્ ।
પરો દૂરેઽસ્તિ વૈકુણ્ઠઃ ઇતિ ધીરસ્ત્યપવિત્રમા ॥ ૨૫॥

અમૃતસ્યન્દિભિર્મુક્તૈર્નિત્યમુક્તૈસ્સભક્તિકમ્ ।
સુમૈસ્સુવર્ણૈસ્ત્વં નિત્યમુક્તૈશ્ચ શ્રીનિધેઽર્ચ્યસે ॥ ૨૬॥

ચિત્રભૂરમૃતં તેજઃ પ્રાણઃ ખં બ્રહ્મ માધવ ।
મૂલં ફલં રસો વૈ સ સુખં તત્ સર્વમપ્યસિ ॥ ૨૭॥

ઘનાઘનપ્રભં શેષધરાધરશિરઃસ્થિતમ્ ।
રમારમણમાહુસ્ત્વાં પરાપરવિદો ગતિમ્ ॥ ૨૮॥

વન્દે વૈકુણ્ઠશૈલેશં વૈકુણ્ઠં કુણ્ઠિતાંહસમ્ ।
એકકણ્ઠ્યં પ્રમાણાનાં યત્ર, યસ્યાપિ ચ શ્રિયા ॥ ૨૯॥

નિહત્યાન્તસ્તમો લોકાનવતે નવતેજસે ।
સર્વગન્ધરસાય સ્યાદ્વિચિત્ર શ્રીશ તે નમઃ ॥ ૩૦॥

અસ્તદોષં સમસ્તાઢ્યં શસ્તં કસ્તં સ્તવૈસ્સ્તુવન્ ।
પારં દ્રક્ષ્યત્યતો નૈષ પરીહાસાય મે શ્રમઃ ॥ ૩૧॥

શ્રીવેઙ્કટેશાય નમઃ ।
જ્ઞાનશીલનિધિં નૌમિ મુનિં શ્રીરઙ્ગલક્ષણમ્ ।
ગુરું, ગુરોર્મુખાદ્યસ્ય શ્રીવાસો ભરમગ્રહીત્ ॥ ૩૨॥

પ્રપદ્યે પઞ્ચસંસ્કારગુરું ત્ર્યન્તલક્ષ્મણમ્ ।
નિત્યશ્રીવાસનિધ્યાનપૂર્ણેજ્યં પ્રાજ્ઞયોગિનમ્ ॥ ૩૩॥

નાનાકૃતિકૃતક્ષેમં નારાયણગિરિસ્થિતમ્ ।
પ્રપત્તિદર્શનં વન્દે દેશિકં વેઙ્કટેશ્વરમ્ ॥ ૩૪॥

શ્રુતિચક્ષુર્બલદ્યોઽસૌ શ્રીનિધિં દેવતોત્તમમ્ ।
સ્થાપયામાસ યોગીન્દ્રશ્શેષ એતં શ્રયેઽનિશમ્ ॥ ૩૫॥

બદ્ધાઞ્જલિપુટો નિત્યં પ્રપદ્યે સપ્ત પર્વતાન્ ।
શ્રિયા વિહરતે સાર્ધં યેષુ નઃ પુરુષોત્તમઃ ॥ ૩૬॥

અહીન્દ્રશૈલવાસ્તવ્યમદ્ભુતં ધામ તન્મયિ ।
અપાઙ્ગરિઙ્ગણં કિઞ્ચિદાતનોત્વનુકમ્પયા ॥ ૩૭॥

આનન્દાત્મ યદાશ્રિત્ય સુખમિન્ધે જગત્રયમ્ ।
શેષશૈલશિરોરત્નં પ્રત્નં તદ્ધ્યતાં મયિ ॥ ૩૮॥

મહિમાઽનન્યસામાન્યો માન્યં સૌલભ્યમીશ્વરે
શ્રૂયતેઽસ્તીતિ યત્તસ્ય દેવ એષ નિદર્શનમ્ ॥ ૩૯॥

કટાક્ષાય નમસ્તસ્મૈ વેઙ્કટબ્રહ્મણો વિભો ।
અનુકમ્પામુપાશ્લિષ્ય જાગ્રધઃ કુરુતે જગત્ ॥ ૪૦॥

નિઃશ્રેયસસ્થલમિવૈષ ફણિન્દ્રશૈલો ।
નાથ ત્વયા ભવતિ મઙ્ગલવિગ્રહેણ
તન્માદૃશાનનુગૃહાણ તથા યથા ત્વામ્ ।
આરાધયેયુરપિ તામનપેક્ષ્ય મુક્તિમ્ ॥ ૪૧॥

નૂનં વસન્નપિ ભવાનમૃતે વિભૂતૌ
આત્મપ્રભાભિરતસીસુમમેચકાભિઃ ।
વ્યાપ્નોતિ વેઙ્કટવિભો ભુવનાન્યથાપિ
ભાગ્યાય નસ્તવ તુ મઙ્ગલવિગ્રહોઽયમ્ ॥ ૪૨॥

પિત્રોરનુગ્રહપદં ન પરં સુપુત્રાઃ
દુષ્ટાસ્સુતા અપિ તદસ્તુ રમાનિવાસ ।
બાઢં તુ વિશ્વસિમિ હાનપદં ન ચાહં
ક્કેવોપયોક્ષ્યત ઇયં કરુણા વિના મામ્ ॥ ૪૩॥

યાચે ભવન્તમિહ કાઙ્ક્ષિતમર્પયેતિ
નો ચેદ્વિભો ક્ક તવ ગચ્છતુ શેષ એષઃ ।
ત્રાયસ્વ વા વૃષગિરીશ દયાપ્રભાવાત્
આહો ત્યજ ધ્રુવમિદં શરણં ત્વમેવ ॥ ૪૪॥

દ્વિદશશતરસજ્ઞો નાયમીષ્ટેઽપરાધાન્
મમ ગણયિતુમેષા નિષ્કૃતિસ્સા ક્ક કોણે ।
અતિવિમલધિયો યાં યાં મુનીન્દ્રાસ્સ્મરન્તિ
ત્વયિ શમયતુ તત્તાન્ સાઞ્જલિર્મે પ્રણામઃ ॥ ૪૫॥

સકૃદપિ યદિ શેષશ્શેષશૈલેશ્વર ત્વાં
નમતિ નિહિતબુદ્ધિઃ તત્પ્રભૃત્યેષ ધન્યઃ ।
મમ તુ કિમિહ કુર્યાં ચઞ્ચલં માનસં યત્

ક્ષણમપિ ન પુનસ્ત્વદ્વ્યુગ્રતામેતિ કૃચ્છાત્ ॥ ૪૬॥

ત્વયિ વિનિહિતબુદ્ધિર્નાથ જાત્વેષ ભૂયાત્
ભવતુ મયિ દયા તે મા પ્રતીક્ષસ્વ કિઞ્ચિત્ ।
તૃણમપિ ન ચલેત્ત્વામન્તરેણેતિ સત્યે
મમ કથમિહ યત્નસ્સિધ્યતુ ત્વાં વિનૈવ ॥ ૪૭॥

અનુદિનમતિભાગ્યાદાશ્રયન્તે ભવન્તં
ય ઇહ વિમલચિત્તાઃ દ્વિષ્ટસંસારદુઃખાઃ ।
ન ન ભવતિ તદા નઃ તૈસ્સહ ત્વત્સ્તવેચ્છા
વૃષગિરિભુવિ વિષ્ણો માં યદિ ત્વં દયેથાઃ ॥ ૪૮॥

પુનન્તુ પાદામ્બુજયુગ્મરેણવઃ
ફણીન્દ્રશૈલેશ્વર તે પ્રતિક્ષણમ્ ।
સ્મરન્ ધ્રુવં યાન્ સમયેષુ સાદરં
પ્રગલ્ભતે પ્રાર્થિતલમ્ભને જનઃ ॥ ૪૯॥

વૃષાદ્રિશૃઙ્ગે વિભવં શ્રિયઃપતે
વિભાવ્ય તે વિસ્મરતાત્ કથં જનઃ ।
મુહુર્મુહુર્યઃ ક્રમશોઽનુસંહિતો
વિધાસ્યતિ ત્વય્યતુલાં દૃઢાં મતિમ્ ॥ ૫૦॥

શ્રિયઃપતે વૈભવમેવ તે મહત્
યદાશ્રિતસ્સન્ગિરીનહો જનઃ ।
અખિન્નપાદસ્સુખમેવ લઙ્ઘયન્
સિસેવિષુસ્ત્વામભિવન્દ્ય મોદતે ॥ ૫૧॥

જગન્નિયન્તા ન ભવેદ્ભવેદ્વા
નાસ્તે યતો જાતુ ન દૃશ્યતેઽપિ
યદ્યસ્તિ દૃશ્યેત તદેતિ પક્ષઃ
ત્વયા વૃષાદ્રીશ વિલીયતે સ્મ ॥ ૫૨॥

આમ્નાયબાહ્યે જગતિ પ્રભૂતે
ન કશ્ચન ત્વાં ધ્રુવમભ્યુપૈષ્યત્ ।
નચેદ્ભવાન્ શેષમહીધ્રભૂમૌ
અદ્યોતયિષ્યત્સ્વમનન્યવેદ્યઃ ॥ ૫૩॥

મન્યે ય એતાદૃશમીશ્વરં ત્વાં
 પ્રવર્તતે હન્ત જનો નિરોદ્ધુમ્ ।
કલેસ્સ કોઽપિ પ્રભવઃ પ્રમૂઢઃ
 કથઞ્ચ કેનાપિ ન શિક્ષણીયઃ ॥ ૫૪॥

ભોક્તવ્યં કૃતમિતિ નિશ્ચિતા મતિર્મે
 ખેદસ્તુ પ્રતિદિનમપ્યસહ્ય એષઃ ।
યાચેઽહં વૃષગિરિનાથ દીનદીનઃ
 પાપાનિ પ્રશમય મે કટાક્ષિતૈસ્તે ॥ ૫૫॥

ધન્યાસ્તે ફણધરભૂધરે તુ વૃક્ષાઃ
 ધન્યાસ્તે પ્રતિદિવસં તુ કિઙ્કરાસ્તે ।
ધન્યાસ્તે વિમલધિયઃ સ્તુવન્તિ યે ત્વાં
 ધન્યસ્સ્યામહમિહ તે કટાક્ષિતેન ॥ ૫૬॥

બ્રહ્માદ્યાઃ પ્રણિહિતમાનસાસ્સુરાસ્તે
 સન્તીતિ શ્રિતદય મા ભવાનુદાસ્તામ્ ।
સત્યં યત્તવ ન સુદુર્લભાઃ સ્તવાસ્તે
 દિષ્ટ્યા તુ ક્ષણમિહ દત્તદૃષ્ટિરસ્મિ ॥ ૫૭॥

ઇષ્ટં યદ્ભવતિ તદાપ્તયે જગત્યાં
 સુસ્પષ્ટં વદતિ જનો હ્યુપાયભેદાન્
સન્ત્વેતે, યદિ ન ભવાન્ દયેત કિં સ્યાત્
 ત્તદ્યાચે દ્રુતમિહ મે ફલં પ્રયચ્છ ॥ ૫૮॥

યસ્યાદરેણ ભવતો નનુ વેઙ્કટાખ્યઃ
 પાપાપનોદનવિધૌ પટુરેષ શૈલઃ
યસ્યાનુભાવમનુમાય મહર્ષયસ્તે
 વાઞ્છન્તિ તત્ર તૃણતાં તમહં ભજામિ ॥ ૫૯॥

શ્રીશ ત્વયા કિમિતિ વાઽઽદ્રિયતે વૃષાદ્રિઃ
 તસ્યાથવા ફલમિદં તપસસ્તુ કસ્ય ।
જ્ઞાનેન વા કિમથ તસ્ય વૃષાદ્રિનાથ
 ચિત્તે તુ મે વસ ન કિઞ્ચન કર્તુમીશે ॥ ૬૦॥

લજ્જે ન કર્તુમિહ કિઞ્ચન યન્નિષિદ્ધમ્
 બદ્ધાઞ્જલેસ્ત્વયિ નતિસ્તુ ન બુદ્ધિપૂર્વા ।

ભવ્યં તથાપિ ભવિતેતિ વૃષાદ્રિનાથ
    મન્યે દયાર્દ્રભવદીયકટાક્ષલાભાત્ ॥ ૬૧॥

કદાચિદાસાદ્ય વૃષાદ્રિશૃઙ્ગં
    વિલોક્ય તે વૈભવમાશ્રિતસ્ત્વામ્ ।
સત્યં હરે વેઙ્કટશૈલનાથ
    વિહાતુમિચ્છેન્ન કદાપિ તુ ત્વામ્ ॥ ૬૨૨॥

અહમહમિકયા સિસેવિષૂણાં
    યદિ નિચયં પ્રતિવાસરં જનાનામ્ ।
વૃષગિરિશિખરે વિલોક્ય ઋદ્ધો-
    ત્યથ કિમુ તે પદસેવિનાં વિચારઃ ॥ ૬૩॥

વિસૃત્વરો યસ્ય કટાક્ષ એષ
    વિનમ્રમિષ્ટૈરભિષિઞ્ચતિ દ્રાક્ ।
ભજે તમેતં વૃષશૈલદેવં
    શ્રિયઃપતિં શેખરમાગમાનામ્ ॥ ૬૪॥

નિરત્યયં ખેલતુ ભાવના મે
    યથા ચ તે મઙ્ગલવિગ્રહેઽસ્મિન્ ।
તથા દયેથાઃ વૃષશૈલનાથ
    યથા ચ નાન્યત્ર ગતિર્મમાસ્તુ ॥ ૬૫॥

યસ્યાનુભાવં સ્વયમૈકમત્યાત્
    ઉચ્ચૈર્વદન્તિ શ્રુતયો વિભિન્નાઃ ।
અહીન્દ્રશૈલસ્ય શિરોમણિં તમ્
    આશ્રિત્ય નારાયણમસ્મિ તુષ્ટઃ ॥ ૬૬॥

હૃદયેષુ સતાં વૃષાદ્રિશૃઙ્ગે
    નિગમાન્તેષુ ચ નિત્યમુલ્લસન્તમ્ ।
કમપિ શ્રિતવત્સલઞ્ચ લક્ષ્મી-
    પદલાક્ષાઙ્કિતવક્ષસં સ્મરામિ ॥ ૬૭॥

અસ્માકમાર્તિશમનાય વૃષાચલેઽસ્મિન્
    અધ્યક્ષિતઃ કલશવારિધિકન્યકેશઃ ।
કારુણ્યસારકલિતેન કટાક્ષિતેન
    શ્રેયસ્તનોતુ શરણમ્ જગતાં ત્રયાણામ્ ॥ ૬૮॥

નિરીક્ષમાણઃ કૃપયાઽર્થિનં જનં
    પરીક્ષમાણશ્ચ વૃષાચલેશ તમ્ ।
યથા ન ખેદોઽસ્ય ભવેત્તથા ભવાન્
    હિતં વિતન્વન્નખિલઞ્ચ રક્ષતિ ॥ ૬૯॥

રમામુખામ્બુજોલ્લાસવીક્ષણસ્મેરચક્ષુષઃ
પ્રસીદન્તુ કટાક્ષાસ્તે વૃષશૈલેશિતુર્મયિ ॥ ૭૦॥

    અર્થાદૌ પ્રૌઢિમાભાવેપ્યપરિત્યાજ્યતાં વિદન્
    શ્રીનિવાસસ્તુતિં વેગાદ્વ્યતાનીદ્વીરરાઘવઃ ॥ ૭૧॥

શ્રીનિવાસાય નમઃ

સમ્યગ્ વિભાવ્ય સકલં પુનરૈહિકાદ્યં
    માયાવશેન ભવતા કમલેશ સૃષ્ટમ્ ।
સર્વાત્મકં સુખમયઞ્ચ ભવન્તમીહે
    દૃષ્ટ્વા ગુરોશ્ચ ભવતિ સ્વયમૈકતાન્યમ્ ॥ ૭૨॥

અત્યન્તસુન્દરમુખામ્બુજમન્દહાસાત્
    નેત્રોત્પલપ્રહિતનિસ્તુલવીક્ષિતૈશ્ચ ।
ક્ષેમં દધત્સકલલોકનિદાનમેષ
    શેષાદ્રિશેખરમણિશ્શરણં મમાસ્તુ ॥ ૭૩॥

કલશપયોધિજાકમલસોદરનેત્રયુગ-
    પ્રહિતકટાક્ષવર્ષકૃતનીલિમમૂર્તિરસૌ ।
નિગમશિરોભિરાકલિતનૈજગુણાંશકલઃ
    કલયતુ મઙ્ગલં સતતમેષ વૃષાદ્રિપતિઃ ॥ ૭૪॥

પદ્મયાઽલઙ્કૃતોરસ્સ્થલં પ્રાર્થયે
    પૂરુષઞ્ચોત્તમં શેષશૈલેશ્વરમ્ ।
દુઃખમાગન્તુ મે દૂરતઃ પ્રક્ષિપત્
    ભૂરિકલ્યાણકૃદ્વીક્ષિતં પ્રેષ્યતામ્ ॥ ૭૫॥

સુરમૌલિમકુટમણ્ડનમન્દારસ્રઙ્મરન્દમેદુરિતમ્ ।

સંવાહિતં શ્રિયા નઃ શ્રિયં સમેધયતુ શૌરિપદપદ્મમ્ ॥ ૭૬॥

કલશામ્બુરાશિકન્યાકૌસ્તુભવનમાલિકાદિકલિતં તત્
વક્ષસ્સ્થલં વિધત્તાં વેઙ્કટનાથસ્ય મઙ્ગલાનિ મમ ॥ ૭૭॥

દિવિ તિષ્ઠતિ વૃક્ષ ઇવ સ્તબ્ધ ઇતિ ત્વાં ધરેઽત્ર તિષ્ઠન્તમ્ ।
સકલફલકલ્પવૃક્ષં પુરુષં શ્રીમન્ શ્રુતિસ્સ્તૌતિ ॥ ૭૮॥

કલયામિ સન્તતમિમં કમપિ કૃપાવારિશેવધિં દેવમ્ ।
વિનતજનજાતરક્ષાદીક્ષં શ્રીભૂમિવલ્લભં શરણમ્ ॥ ૭૯॥

વેઙ્કટભૂધરશિખરદ્યોતિ પરં કિમપિ ધામ નિર્હેતુ ।
નિખિલજગદેકહેતુર્નૈસર્ગિકગુણગભીરમસ્તુ હૃદિ ॥ ૮૦॥

આશ્રિતરક્ષણસૂચકહસ્તામ્બુજમુદ્રમખિલદેવમિમમ્ ।
શેષમહીધરભૂષણમેષ જનઃ શ્રીનિધિં નમતિ ॥ ૮૧॥

અનિદમ્પ્રથમાનિ વચાંસ્યશેષતો બોધયન્તિ યં દેવમ્ ।
વિનતાતનયમહીધરશિખરપરિષ્કારમાશ્રયે શ્રીશમ્ ॥ ૮૨॥

સર્વત્ર જગતિ તિષ્ઠન્ સર્વસ્યાપ્યશ્રયઃ શ્રિયઃકાન્તઃ ।
નારાયણશિખરિશિરઃપરિષ્કૃતિશ્શરણમસ્તુ દેવો નઃ ॥ ૮૩॥

વિદ્યુદુદઞ્ચિતદીપ્તિસ્તરુણો ધારાધરો યથા દેવઃ ।
અઞ્જનગિરિમધિતિષ્ઠન્નઞ્જનમખિલં વ્યપોહતુ શ્રીશઃ ॥ ૮૪॥

જગતસ્સુખમેધયતે મેધાં ભક્તિઞ્ચ સમ્પદં દદતે ।
વૃષપર્વતશિખરજુષે શ્રીમણ્ડિતવક્ષસે નમસ્સતતમ્ ॥ ૮૫॥

પ્રહ્લાદમન્વગૃહ્ણાત્કૃપાનિધિઃ શ્રીનૃસિંહમૂર્તિર્યઃ ।
સિંહાચલશિખરગતો દેવઃ શ્રીવલ્લભસ્સ એષ ગતિઃ ॥ ૮૬॥

સપ્તાચલાધિનાથો દ્વિસપ્તલોકાધિરાજ એષ હરિઃ ।
સઙ્ખ્યાતીતૈ રૂપૈસ્સમુલ્લસન્ શ્રીપતિઃ પરં શરણમ્ ॥ ૮૭॥

સપ્તશૈલસ્વામિને નમઃ ।
॥ શ્રીમતે હયવદનપરબ્રહ્મણે નમઃ ॥

॥ વર્ણમાલાસ્તવઃ ॥

અસ્તુ વસ્ત્વિદમનન્તભૂધરે નિસ્તુલદ્યુતિ સમસ્તદૈવતમ્ ।
શસ્તદં શ્રિતવતામુરસ્તલન્યસ્તમાનિતરમં પરં હૃદિ ॥ ૮૮॥

આદરેણ વૃષભૂધરેશિતુર્મેદુરેણ ભયધૈર્યનિશ્ચયૈઃ ।
પઙ્કજાતસદૃશે પદે નતિઃ પઙ્કજાતશમનીયમસ્તુ નઃ ॥ ૮૯॥

ઇજ્યયાઽહમહિરાજભૂભૃતઃ પ્રાજ્યયા પરિબૃઢં પ્રહર્ષયન્ ।
નિત્યમસ્ય પદપદ્મચિન્તયા કૃત્યકૃદ્ભવિતુમસ્મિ કામનઃ ॥ ૯૦॥

ઈડિતું શ્રુતિગણૈસ્સદોદ્યતૈઃ વ્રીડિતં હિ યમનન્તભૂમકમ્ ।
તસ્ય શેષગિરિશ‍ૃઙ્ગવાસિનઃ ન્યસ્ય પદ્યધિમુદસ્મિ મે ભરમ્ ॥ ૯૧॥

ઉચ્ચનીચપદભેદચિન્તનાં વ્યુચ્ચરન્ત્યવિકલં વિના યતઃ ।
પદ્મવાસરસિકાપતેર્દયાસદ્મનો દૃશ ઇમં શ્રયેઽનિશમ્ ॥ ૯૨॥

ઊર્જિતં કિમપિ ધામ સંશ્રયે વર્જિતં સ્વયમશેષહેયતઃ ।
શેષશૈલશિખરાગ્રભૂષણં શેષભૂતનિખિલં શ્રિયઃપતિમ્ ॥ ૯૩॥

ઋદ્ધિરત્ર ચ પરત્ર ચાર્થ્યતે સિદ્ધિરાત્મશુભકર્મણો યતઃ ।
વ્યક્તિમેત્ય વૃષપર્વતે સ્થિતં સક્તિમેતિ તમવેક્ષિતું મનઃ ॥ ૯૪॥

નૄનસાવનુજિઘૃક્ષુરાદરાદેનસા દિવમુપૈતુમક્ષમાન્ ।
અઞ્જનાચલશિરઃ શ્રિતો રમારઞ્જનો ય ઇમમાશ્રયેમહિ ॥ ૯૫॥

ક્લૃપ્તચેતસમદુષ્ટરક્ષણે દૃપ્તદુષ્ટદમને ચ માધવમ્ ।
અંહસાં નિધિરયં જનો હરિં રંહસા શરણમેતિ વિશ્વસન્ ॥ ૯૬॥

એતિ યો ગિરિમુપૈતિ તે પદં હેતિભૂષણલસદ્વિભૂતિક ।
સ શ્રયત્યભિમતાનિ સત્પદાન્યશ્રમેણ ભુવનેષ્વપિ ત્રિષુ ॥ ૯૭॥

ઐન્દ્રમુખ્યપદચિન્તનં વૃથા ચન્દ્રકોટિજયિનો વૃષેશ્વર ।
વ્યાકૃતાનવધિનામરૂપ તે હ્યાકૃતેઃ પદમિદં પરં પદમ્ ॥ ૯૮॥

ઓજસૈષ વિદધદ્ભુવં વશે ભો જનાઃ નસ્યતિ શેષભૂભૃતિ ।
વિપ્રતીપવિધિભિઃ કિમસ્તિ વઃ ક્ષિપ્રમેષ શરણં ચિકીર્ષ્યતામ્ ॥ ૯૯॥

ઔદરૈકનિરતાન્ ધનાર્થિનોપ્યાદરેણ હરિરેપ મુક્તિદઃ ।
પશ્યતીહ વૃપવલ્લભો જનાઃ નશ્યથ સ્વયમુપેત્ય કિં પરાન્ ॥ ૧૦૦॥

અમ્બુજાક્ષ ઇહ શેષભૂધરે કમ્બુચક્રલસદંસકુણ્ડલઃ ।
પ્રત્નનવ્યબહુભવ્યભૂષણો રત્નરાશિરિવ રાજતિ સ્થિરઃ ॥ ૧૦૧॥

અઃ પરો યદિહ તત્પરઃ સ્થિતઃ, કઃ પરશ્શુભકરશ્શ્રયેમ તમ્ ।
શેષવાસરસિકેઽત્ર શેષિતા શેષતાપિ યદશેષતસ્સ્થિરા ॥ ૧૦૨॥

કમલદળવિમલશીતળકર્ણાન્તવિશાલલોચનોદારમ્ ।
કમપિ કમલાસનાથં કલયે વૃષશૈલવિહરણં કૃષ્ણમ્ ॥ ૧૦૩॥

ખરશઠકઠોરહૃદયસ્વભાવભેદિપ્રભાવભૂમાનમ્ ।
ખરકિરણકોટિભાસ્વરમખરકરાહ્લાદમચ્યુતં વન્દે ॥ ૧૦૪॥

ગતિમન્યેષ્વાત્મનિ વા ફલાર્થિનામપ્યનર્થિનાઞ્ચ પરમ્ ।
સર્વાન્તરં સમેતં સમયા રમયા દયાનિધિં નૌમિ ॥ ૧૦૫॥

ઘનસુકૃતજનસમર્ચિત ઘનાઘનપ્રાર્થ્યદિવ્યભવ્યાભ ।
અઘનોદન જીવઘનાત્ પરં શ્રિયસ્ત્વાં પતિં સમીક્ષેય ॥ ૧૦૬॥

ઙ્સઙ્સિનિત્યવિચારો દ્રવ્યગુણસ્પન્દસતતઘોષશ્ચ ।
વ્યર્થો વૃષશૈલપતેસ્સન્તશ્ચિન્તયત સન્તતં રૂપમ્ ॥ ૧૦૭॥

ચરણં વૃષશૈલમણેસ્તરણં જગતસ્સમાશ્રયે શરણમ્ ।
અરુણામ્બુજદળસુન્દર કરુણારસનિર્ભરાયતાક્ષ તવ ॥ ૧૦૮॥

છવિભિસ્સકલં તેજશ્છાદયતે યસ્સ્વયમ્પ્રભઃ પ્રભવઃ ।
તમહં તરુણપયોધરવર્ણં વૃષશૈલવિહરણં પ્રણતઃ ॥ ૧૦૯॥

જગદવન-હરણ-ભવનાદ્યાશ્ચર્યક્રીડમઞ્જનાપીડમ્ ।
રમયા સનાથમમલં હૃદયે મે પ્રાર્થયે સ્થિતયે ॥ ૧૧૦॥

ઝટિતિ ત્યજતિ ભવન્તં સન્તતમભ્યસ્તલોલુપં ચિત્તમ્ ।
વૃષશૈલશિખરવિહરણ વિવરીતું ત્વાં કદા નુ તે કામઃ ॥ ૧૧૧॥

ઞાવ્ ઞાવિતિ કલહપરો ભક્ષે માર્જાર ઇવ જનો યત્ર ।
પરહાનિ-સ્વાત્મસુખપ્રવણસ્તસ્માદ્રમેશ રક્ષ ભવાત્ ॥ ૧૧૨॥

ટીકાશ્શતં વિધત્તાં વ્યાચષ્ટાં શ્ૃતિષુ કામમર્થશતમ્ ।
કિં તેન યદિ વિરજ્ય ન ભૃઙ્ક્તેન ધ્યાયતીહ વિષ્ણો ત્વામ્ ॥ ૧૧૩॥

ઠક્કિતિ યાવત્પ્રાણાઃ ન તનોર્નિર્યાન્તિ તાવદસ્ત્વેષઃ ।
પરિપોષિતભક્તિરસો ભુવિ ભવતિ ધ્યાનપૂજનૈશ્શ્રીશ ॥ ૧૧૪॥

ડયત ઇતિ વિહગમાત્રં ન કથઞ્ચન તે રથો યથા વિષ્ણો ।
અહમપિ તથા ન વિધિરિવ તથાપિ નાથ સ્તુતિપ્રિયેક્ષસ્વ ॥ ૧૧૫॥

ઢક્કાદિવાદનોલ્બણનાટ્યરસેન સ્તવેન ભવ્યેન ।
અનુભૂય રાધયતિ યં શમ્ભુસ્તં સિંહશૈલગં સ્તૌમિ ॥ ૧૧૬॥

ણ ઇતિ હિ વર્ણો વાર્ણાસિદ્ધેર્વિષ્ણોશ્ચ વર્ણને હેતુઃ ।
નારાયણસંજ્ઞાં ત્વયિ નિયમયતિ શ્રીવૃષાદ્રીશ ॥ ૧૧૭॥

તટિદુજ્જ્વલો ઘનો યો વનમાલાશોભનો વૃષાધીનઃ
તદ્દૃષ્ટૌ ન ભવેયુઃ કેકાઃ કથમત્ર પક્ષિણાં મધ્યે ॥ ૧૧૮॥

સ્થિરકૃષ્ણ પક્ષરમ્યા હંસાઃ પ્રાપ્તા અહં સ ઇતિ યાગમ્ ।
સ્વપરભિદૈકપરા ઇહ ચિત્રં શુદ્ધાશ્ચરન્તિ વૃષે ॥ ૧૧૯॥

દક્ષાસ્સન્તિ ગિરીશાસ્તદૈવ તે સર્વમઙ્ગલાકારાઃ ।
સદ્ગણપતયસ્સુગુહાશ્શેષગિરીશાન ભક્તૌઘાઃ ॥ ૧૨૦॥

ધાવન્તિ ચ ધોરન્તિ ચ ધયન્તિ ચ ત્વાં સ્તવૈશ્ચ ધિન્વન્તિ ।
લબ્ધઞ્ચ ધારયન્તિ શ્રીશેત્થં પઞ્ચધા ભક્તાઃ ॥ ૧૨૧॥

નાગેન્દ્રનગવરં યો ન ગતો નગતો નરસ્ય નાસ્ય ભિદા ।
ફલદં નગસ્ય જન્મ સ્યાદસ્ય તુ નિષ્ફલં જન્મ ॥ ૧૨૨॥

પાણિપયોજગતસ્તે શઙ્ખો હંસસ્સુદર્શનશ્લિષ્ટઃ ।
શ્રીમન્ પદપદ્મગતૈર્હંસૈર્દૃષ્ટોઽથ માનસે લસતિ ॥ ૧૨૩॥

ફલમિદમેવેતિ સતાં ફલદં ત્વરયેતિ સંસૃતિં વહતામ્ ।
યત્ર પરા પ્રતિપત્તિઃ તત્ ત્વદ્રૂપં વૃષાદ્રીશ ॥ ૧૨૪॥

બેરૈઃ પઞ્ચભિરેતૈસ્સવ્યૂહઃ પર ઇવ ત્વમુલ્લસસિ ।
વૃક્ષ ઇવૈકસ્સ્તબ્ધો દિવિ તિષ્ઠન્ શેષશૈલશિખરે ત્વમ્ ॥ ૧૨૫॥

ભવતુ ભગવન્મુકુન્દ શ્રીવલ્લભ વેઙ્કટાદ્રિશૃઙ્ગમણે ।
કુલદૈવ કલ્પવૃક્ષન્ત્યેવં ત્વયિ મે વચોઽજસ્રમ્ ॥ ૧૨૬॥

મદનકદનૈર્ધનાયાવેતાલ્યા પારલૌકિકૈર્ધર્મૈઃ ।
ભૃશમત્ર કર્શિતાનાં પરાયણં ત્વં રસાયનં ભગવન્ ॥ ૧૨૭॥

યસ્યાઃ કણાસ્સરન્તો ભાગ્યવશાત્સંહતાસ્સુખાય ભુવઃ ।

વિલસન્તિ તત્રતત્ર શ્રીમન્ વાત્સલ્યદીર્ઘિકા સા ત્વમ્ ॥ ૧૨૮॥

રમયિતુમેવ રમાં ત્વં ભૂમિમવિન્દઃ પ્રજાશ્ચ પાસીતિ ।
ગમયતિ ઘોષો નામ્નોઃ કથાં રમારમણ ગોવિન્દ ॥ ૧૨૯॥

લક્ષ્મીં શુકપુરિ તપસા પ્રાપ્ય શ્રીશૈલશ‍ૃઙ્ગશ‍ૃઙ્ગારઃ ।
તપસો વિદૂરભવિનસ્તપસ્વિનો વીક્ષસે દયયા ॥ ૧૩૦॥

વન્દારુનન્દથુવહં વૃન્દાવનચારિ વારિજાઽઽતામ્રમ્ ।
શુભશેષભોગવાસં શ્રીવાસ ત્વત્પદં વિભાતુ હૃદિ ॥ ૧૩૧॥

શક્તો દિવિ સ્થિતસ્ત્વં સર્વત્ર તથાપિ શેષમાયાતઃ ।
અસમર્થબદ્ધભક્તવ્રાતસમાશ્લેષવિરહસન્તપ્તઃ ॥ ૧૩૨॥

ષડ્ગુણમન્નં દિવ્યં ત્રિગુણરતાન્ સાદરં સમાસ્વાદ્ય ।
અક્લેશતો વિરક્તિં વર્ધયસે વૃષગિરીશ ત્વમ્ ॥ ૧૩૩॥

સદ્યઃ ફલં પ્રયચ્છતિ કલ્પતરૌ સત્પશૈલશિખરસ્થે ।
અનુકલ્પભૂતમલ્પદમન્યદ્દૈન્યેન કિં સેવ્યમ્ ॥ ૧૩૪॥

હયવદનાદ્યવતારૈરાબ્રહ્મમનુષ્યમાન્ધ્યહર્તારમ્ ।
વેદગિરિશિખરશેખરમિમં નુમો ભક્તિધીવૃદ્ધ્યૈ ॥ ૧૩૫॥

॥ ઇતિ વર્ણમાલાસ્તવઃ ॥

કુણ્ડલિરાજગિરિસ્થઃ ખણ્ડિતસકલાન્તરાય એષ હરિઃ ।
કલ્યાણં કલયતુ નઃ કલશાકૂપારકન્યકાનિલયઃ ॥ ૧૩૬॥

વૃષગિરિશિખરવિહારી વૃષમુખવિબુધાભિવન્દ્યપદપદ્મઃ ।
વૃષમસ્માસુ વિધત્તાં વીક્ષાવલિતૈર્વિશિષ્ટકારુણ્યૈઃ ॥ ૧૩૭॥

પુષ્ણાસિ ભોગમખિલં ક્લિશ્નાતિ ન કિઞ્ચિદાશ્રિત ઇહ ત્વામ્ ।
તમિમં મુકુન્દ વન્દે દેવં ત્વાં વૃષગિરીશાનમ્ ॥ ૧૩૮॥

અઞ્જનાચલવિભૂષણં ભજે કઞ્જલોચનમશેષદૈવતમ્ ।
આદરેણ નિગમાન્તદેશિકો યો બભૂવ જગદુદ્દિધીર્ષયા ॥ ૧૩૯॥

શ્રીનિધાનમનપાયિ વત્સલં તન્નિધાનમધિશેષભૂધરમ્ ।

સાવધાનમનુભોક્તુમાદરાત્સંવિધાનપરમસ્તુ મે મનઃ ॥ ૧૪૦॥

આશ્રયે શ્રિતજનાવને સ્થિતં ધામ દિવ્યમનઘં દયાનિધિમ્ ।
વેઙ્કટાચલવિહારિ વારિદશ્યામસુન્દરમઘાપનુત્તયે ॥ ૧૪૧॥

કામયે કમલકોમલં તવ ક્ષાન્તિસાગર પદં પરાયણમ્ ।
કામ એષ મમ કાપથે બત પ્રસ્થિતિં ન પુનરેતુ કિઞ્ચન ॥ ૧૪૨॥

ખેદવર્ષકરકાભિરાહતે મોદહેતુરિહ નો મનાગપિ ।
કાપથે પુનરિદં પ્રવર્તતે કષ્ટમીશ્વર મનો રુણત્સિ નો ॥ ૧૪૩॥

ઇષ્ટમેતદિતિ વેઙ્કટેશ્વર સ્વલ્પમપ્યમલ નૈવ ચિન્તયે ।
પારતન્ત્ર્યપરિકર્મિતસ્ય મે તન્ન યુજ્યત ઇતિ સ્થિતઃ પુનઃ ॥ ૧૪૪॥

અઞ્જનેશ ભુવિ રઞ્જયન્શ્રિતાન્ ભઞ્જનં ન કુરુષે મમૈનસઃ ।
કઞ્જલોચન કૃપાનિધે કથં કલ્મષક્ષપણનામકીર્તન ॥ ૧૪૫॥

પાપમચ્યુત કૃતં પુનઃપુનર્ધીહરં ખલુ મયાઽનુભૂયતે ।
પુણ્યમસ્તિ યદિ મે યદૃચ્છયા પદ્મવાસરસિકેશ પાહિ મામ્ ॥ ૧૪૬॥

દુષ્કૃતસ્ય કરણે દૃઢં મનઃ દૂયતે પુનરથો મનાગિવ ।
પ્રત્યહં યદિદમીદૃશં હરે કીદૃશી ગતિરહો ભવિષ્યતિ ॥ ૧૪૭॥

નાસ્તિ મે ગતિરનન્યવત્સલ શ્રીનિધે સકલલોકરક્ષક ।
દેહિ દિવ્યજલદોપમદ્યુતે તાપશાન્તિમભયઙ્કરો ભવ ॥ ૧૪૮॥

યાવદચ્યુત પવિત્રમાનસપ્રાજ્ઞસાદરસુભાષિતાસ્પદમ્ ।
જીવિતં સકલલોકમાનિતં તાવદસ્તુ ન તુ ચેત્ મૃતિં કુરુ ॥ ૧૪૯॥

દેશિકૈરનઘદિવ્યમાનસૈરાદૃતે પથિ ભવન્મનોહરે ।
શ્રીનિવાસ કૃપયા મનાગ્ગતં પાર્શ્વગર્તપતનાચ્ચ પાહિ મામ્ ॥ ૧૫૦॥

અમ્બુજાસનમુખૈસ્સુરૈસ્સ્તુતં તુમ્બુરુપ્રભૃતિગીતમપ્યહમ્ ।
શમ્બરારિવિવશોઽચ્યુતં શ્રયે ત્વં બલેન તવ રક્ષ માધવ ॥ ૧૫૧॥

કામલેશહતચેતનો ન યો માનનીયવિભવસ્સ સંસૃતૌ ।
સર્વશેષિશુભદિવ્યદમ્પતિપ્રીતિમાત્રમપિ કિન્ન કામ્યતે ॥ ૧૫૨॥

સર્વકામપરિપૂર્ણસેવયા ઘોરકામવશતા વિનશ્યતિ ।
અદ્ભુતં તમિમમઞ્ચનાચલદ્યોતમાશ્રય મનઃ પરાં ગતિમ્ ॥ ૧૫૩॥

ઇન્દ્રિયાણિ ન વશે મનાગપિ શ્રીનિવાસ તમસા વૃત્તોઽસ્મ્યહમ્ ।
જાતુ હન્ત ભવતા ભવત્પ્રિયૈશ્ચેક્ષિતં સપદિ મામુપેક્ષસે ॥ ૧૫૪॥

રક્ષ સમ્પ્રતિ રમાનિવાસ માં રાગસમ્ભૃતપરાગપાંસુલમ્ ।
કાલમેઘ કરુણારસૈશ્શુભૈશ્શોધયન્ વિહિતશુદ્ધજીવનઃ ॥ ૧૫૫॥

વેદપર્વતશિરસ્સ્થિતં પદં વેદ યત્તવ રમાનિધે જનઃ ।
વેદનાભિરનુપપ્લુતસ્સુખં વેદ સોઽત્ર ચ પરત્ર ચાખિલમ્ ॥ ૧૫૬॥

ઇત્થમાશ્રિતજનાવનપ્રિયં દેવદેવમનઘં દયાનિધિમ્ ।
શ્રીનિવાસમિહ વીરરાઘવો દુષ્કૃતોઘમહતીપ્સયાઽઽશ્રિતઃ ॥ ૧૫૭॥

ઉપનિષદ્ભિરુદીરિતમાદરાદુદયતામુપબૃંહણવર્ણિતમ્ ।
સુરમહર્ષિમુખસ્તુતમદ્ભુતં મનસિ સિંહમહીધરણં મહઃ ॥ ૧૫૮॥

કિમિહ નઃ કથયા ભવિતાન્યયા ત્વનયકલ્પિતયા કથયાનયા ।
અવહિતં ભવ વેઙ્કટભૂધરે તવ હિતં નિહિતં મહિતં મનઃ ॥ ૧૫૯॥

પ્રણતલોકપરાયણમાનસં પ્રણમત પ્રણયેન પરાયણમ્ ।
નિખિલવેદગવેષિતમદ્ભુતં વૃષમહીધરદીપ્તમિદં મહઃ ॥ ૧૬૦॥

નિખિલતાપનિબર્હણચુઞ્ચુના નિયમિતસ્વકયુગ્મવિભૂતિના ।
શ્રિતરમઃ કરુણાસહચારિણા દિશતિ વીક્ષિતકેન સ નસ્સુખમ્ ॥ ૧૬૧॥

સકલહંસસમાશ્રયણીયતાં સકલહંસમિદં મણિનૂપુરૈઃ ।
સપદિ નઃ પ્રતિપાદયતીવ તે કમલકાન્તિ પદં કમલાપતે ॥ ૧૬૨॥

હિતકૃતે કૃપયેહ મહીતલે મહિતમઞ્જનશૈલમધિશ્રિતમ્ ।
અનઘમદ્ભુતમઙ્ગલવિગ્રહં કમપિ યામિ ગતિં કમલાનિધિમ્ ॥ ૧૬૩॥

આશ્ચર્યભૂતનિરપાયદયામયીભિ-
        રાર્દ્રીકૃતાખિલવૃષાદ્યચલસ્થલાભિઃ ।
બદ્ધાદરાઽઽહિતનિમજ્જનપાવનીભિ-
        ર્ધારાભિરાઢ્યમવનીધરમાશ્રિતોઽસ્મિ ॥ ૧૬૪॥

અભિતો વિશોભિગિરિકૂટશેખર-
        દ્રુમશૃઙ્ગતુઙ્ગતરશાખિકોજ્જ્વલૈઃ ।
અધિનીરજાતલલિતૈરનોકહૈ-
        ર્હૃદિ પાપનાશશુભતીર્થમસ્તુ નઃ ॥ ૧૬૫॥

ઇતસ્તતો ભિન્નનિજપ્રસારયા
    પ્રભૂતપાપક્ષયવારિધારયા ।
અદભ્રવેગોત્થકણાઽઽહિતાભ્રયા
    મનશ્શરીરઞ્ચ મમાસ્તુ શોધિતમ્ ॥ ૧૬૬॥

આકાશગં ગામપિ સમ્પ્રવિષ્ટ
    આકાશગઙ્ગાસલિલં મહાન્તઃ ।
શ્રેય પ્રદં સંવિનિયોજયન્તો
    ભજન્તિ લક્ષ્મીશ ભવત્પ્રિયત્વમ્ ॥ ૧૬૭॥

સહસ્રસૂર્યોજ્જ્વલદિવ્યતેજસ-
    સ્સરોજવાસાસહધર્મચારિણઃ ।
સુખૈસ્સુશીતૈર્હરિતૈઃ પ્રભાભરૈઃ
    વનં મુદે તદ ઘનપત્રચિત્રિતમ્ ॥ ૧૬૮॥

વને નિવાસોઽપ્યવનેન જીવિતા
    જનેષ્વસક્તિર્જનતાપહારિતા ।
ઘને સ્થિતિસ્ત્વય્યઘનાશશીલતા
    ત્વદદ્રિલીનેષુ હરે જનેરિતાઃ ॥ ૧૬૯॥

હરે ગિરેરસ્ય હિ સર્વતોમુખ-
    પ્રદાનશુધ્ધાન્તરભાવશોભિતાઃ ।
નિવાસિનોઽન્તે સ્વયમાત્તગૌરવા
    ભવન્તિ માન્યા મુદિરા ભવત્પદે ॥ ૧૭૦॥

ન શ્રધા ન મતિઃ ન શક્તિરથ મે કિં સ્યાદદૃષ્ટં શુભમ્
    ધૂર્તાનાં મમ ચાસ્તિ કા ખલુ ભિદા વેષઃ પ્રજામોહનઃ ।
હે શેષાચલશેખરેશ્વર રમાનાથ પ્રભો શાશ્વત
    જ્ઞાનાનન્દવિભૂતિનાયક નય ત્વં માં સ્વયં સત્પથમ્ ॥ ૧૭૧॥

અન્તર્મે ન હિ માત્રયાપિ ભવતિ પ્રેમ શ્રિયઃ પ્રેયસિ
    સ્વામિન્યદ્ભુતનિસ્સમાધિકગુણગ્રામે શુભાલમ્બને ।
કામોઽથાપિ ભવદ્વિલોકનવિધૌ કામૈકવશ્યસ્ય મે
    બાષ્પસ્વેદસગદ્ગદસ્વરમુખપ્રાપ્ત્યૈ કથં યુજ્યતે ॥ ૧૭૨॥

ભક્તાઃ કેચન પાવિતન્નિજગતસ્ત્વય્યેવ્ પાતિવ્રતીં
    બિભ્રાણાસ્તવ પાદપદ્મનતયે શૈલં સમાયાન્તિ યે ।

તાદૃક્ષાઃ મયિ નિત્યદુષ્ટહૃદયે નાથ પ્રભો નીરદ-
શ્યામ શ્રીધર વીક્ષણં સકરુણં યાચે ક્ષિપન્તુ સ્વયમ્ ॥ ૧૭૩॥

કામાર્તન્ન કથં મનો મમ હરે યન્નામ નારીમયીં
હા કષ્ટં પ્રતિમામપીક્ષણપદં પ્રાપ્તાં જહાત્યેવ ન ।
કલ્યાણે કમનીય ઉજ્જ્વલતમે કાલામ્બુદશ્યામળે
કાઙ્ક્ષાકરુપતરૌ વૃષાચલમણૌ કુર્યાત્કદૈતાં રતિમ્ ॥ ૧૭૪॥

ભાગ્યં ભૂરિ વૃષાચલેશ કલયે સ્ત્રીજન્મહેતું યતઃ ।
તારુણ્યોજ્જ્વલ તોયવાહસુભગે ત્વય્યસ્તુ લીનં મનઃ ।
એતત્સામ્પ્રતમમ્બુજેક્ષણ યથા ગોપ્યોઽપિ કૃષ્ણે ત્વયિ
પ્રેમોદ્ગારકષાયિકોમલહૃદો નૈવં મુનીન્દ્રા યતઃ ॥ ૧૭૫॥

આચાર્યૈરુપદિષ્ટમસ્તિ સુદૃઢં સઞ્ચિન્તિતઞ્ચ સ્વયં
નાતો બાહ્યકુદૃષ્ટિમોહનવશં મન્યે મનો યાસ્યતિ ।
એવન્ત્વેપિ યદઞ્જનાદ્રિશિખરપ્રદ્યોત લક્ષ્મીનિધે
ત્વદ્રૂપાનુભવસ્થમસ્તિ ન મનઃ પાપિષ્ઠમેતત્તતઃ ॥ ૧૭૬॥

આગત્યાન્તરવેક્ષણાય ભવતશ્ચિત્તં ન યત્તં બત
પ્રસ્થાને કૃપયા બહિશ્ચ મનુતે પ્રાન્તે સમાયાત્વિતિ ।
ઈદૃક્તન્દ્રિ મહાઘમેતદનઘં ત્વાઞ્ચેત્ દિદૃક્ષેત જા-
ત્વેતદ્વેઙ્કટશૈલનાથ ભગવન્ પ્રત્યૂહિતં મા કુરુ ॥ ૧૭૭॥

ત્વામેષ પ્રણતોઽસ્મિ તે પરિજનાન્ યેઽન્યે ત્વદીયાશ્ચ તાન્
મા મે જાતુ મનઃ ક્રુધા કલુષિતં ભૂયાદ્વૃષાદ્રીશ્વર ।
સહ્યં સર્વમહો વિચિન્ત્ય બહુના યજ્જન્મના સ્વાર્જિતમ્
ક્રોધઃ કિન્તુ મહાગસે પુનરતશ્શાન્તોઽસ્મિ વીક્ષસ્વ મામ્ ॥ ૧૭૮॥

બુધ્ધા યાનિ કૃતાનિ સમ્પ્રતિ કથં પાપાનિ તાનિ પ્રભો
ન સ્મર્યન્ત ઇહાઞ્જનેશ્વર મનો ધૂર્તં મદીયં ધ્રુવમ્ ।
સ્થાતવ્યન્તુ યથા તથા ન ભવિતું યન્નો ભવન્તં પુન-
સ્સાક્ષેપં સ્મરયામિ સર્વસમતાં લક્ષ્મ્યા સહ ત્વં હસ ॥ ૧૭૯॥

દૂરેઽપોહ્ય દુષ્કૃતાનિ કૃપયા પુણ્યાનિ ચેત્સન્તિ મે
તાનિ શ્રીશ બલાત્સમૂહ્ય મયિ પ્રેમ સ્વય પોષય ।
હે ગોપીજનબાન્ધવ પ્રણિપતામ્યન્યા ગતિર્નાસ્તિ મે
તત્ ત્વં તત્ત્વમનુત્તમં તવ પદદ્વન્દ્વં સુખં દર્શય ॥ ૧૮૦॥

ભ્રાજત્પીતસુવર્ણચિત્રવસનં કાઞ્ચીકૃતાલઙ્ક્રિયં
સાલગ્રામસુવર્ણરત્નકુસુમપ્રખ્યાતમાલ્યાઞ્ચિતમ્ ।
કાન્તં તે ઘનસારપુણ્ડ્રલલિતસ્મેરારવિન્દોલ્લસ-
દ્વક્ત્રં દિવ્યકિરીટમઞ્જનપતે રૂપં સ્વયં દર્શય ॥ ૧૮૧॥

વિરક્તગૃહસ્થપ્રાર્થના

શ્રીમાનેષ વૃષાચલેન્દ્રશિખરપ્રાન્તપ્રદીપાયિત-
સ્વૈરવ્યક્તસમસ્તમઙ્ગલનિધિશ્રીમૂર્તિરાધિત્સતામ્ ।
પદ્માપાદપયોજયુગ્મવિગલલ્લાક્ષાપદેશોજ્જ્વલ-
ન્મન્દસ્યન્દિમરન્દમેદુરમહોરસ્કો વિરક્તિં મમ ॥ ૧૮૨॥

કૃત્યાકૃત્યવિવેકદુર્વિધમહાનર્થોપનદ્ધોન્મદ-
પ્રાગ્ણંમન્યકરત્યજદ્દ્રઢપ્રોન્માથિ મન્માનસમ્ ।
તન્મે સમ્પ્રતિ તં પ્રતિ પ્રણતયસ્સન્તુ પ્રિયો યશ્શ્રિયઃ
પ્રેમાર્દ્રં પ્રણિધાપયેન્મન ઇદં કામઞ્ચ નિર્યાપયેત્ ॥ ૧૮૩॥

શ ૃઙ્ગે શેષભુઙ્ગપુઙ્ગવગિરેસ્તુઙ્ગે પરં મઙ્ગલં
શ ૃઙ્ગારં તમનઙ્ગભઙ્ગવિધયે સોઽહં શરણ્યં ગતઃ ।
યો લક્ષ્મીમુખપદ્મલમ્ભિતમહામોદાનઘાપાઙ્ગિત-
શ્રેણીભૃઙ્ગપરમ્પરાસ્વરસમસ્વાઙ્ઘ્રિશ્રિતસ્વાગતઃ ॥ ૧૮૪॥

યત્ખલ્વાશ્રમમદ્વિતીયમનઘં તત્ સદ્વિતીયં શ્રિયઃ
પ્રેયઃ પ્રાપ્તમિદં દ્વિતીયમિહ મે ધર્મઃ પરં વર્ધતામ્ ।
મા ભૂદઞ્જનશૈલશેખર હરે ત્વત્પાદપઙ્કેરુહ-
પ્રાપ્તસ્યાસ્ય કદાપિ કામકદનસ્વલ્પપ્રસઙ્ગોઽપિ મે ॥ ૧૮૫॥

ઇજ્યૌપાસનવૈશ્વદેવવિધિના પૂર્વં પરઞ્ચાશ્રમં
પ્રત્યપ્યન્નસમર્પણેન સુહિતાં વૃત્તિં સુખં પ્રેપ્સતઃ ।
શ્રીમન્નઞ્જનશૈલશ ૃઙ્ગવિલસત્સન્તાન સઙ્કલ્પય
સ્વેનૈવ સ્વકકિઙ્કરત્વવિભવસ્થૈર્યં સયૂથસ્ય મે ॥ ૧૮૬॥

ત્વામેવાનુભવન્નિરન્તરમહં ત્વત્પાદદાસ્યપ્રિયઃ
ત્વત્પ્રીત્યૈ નિયતં વિધાય વિધિવત્સર્વં ગૃહસ્થોચિતમ્ ।

કામોદ્દામકદર્થનાનિ કમલાકાન્ત પ્રભાવેણ તે
દૂરીકૃત્ય કૃતાર્થયેયમનિશં દીનં મદીયઞ્ચ મામ્ ॥ ૧૮૭॥

યસ્તુ પ્રાથમિકાશ્રમસ્સ ભગવન્ ક્ષિપ્રં વ્યતીયાય મે
વાનપ્રસ્થ ઇતીદમદ્ય જગતિ પ્રાપ્તં ભૃશાદર્શનમ્ ।
સંન્યાસસ્તુ ગૃહસ્થધર્મવહનવ્યાક્ષિપ્તનૈજસ્થિતિઃ
તદ્ગાર્હસ્થ્યમિદં વિધત્સ્વ નિયતં ધર્મ્યં પ્રિયં તે મમ ॥ ૧૮૮॥

ઇત્થં વેઙ્કટશૈલશેખરપદામ્ભોજદ્વયૈકપ્રિયઃ
કન્દર્પોદ્ભટદર્પધૂનનકૃતે દેવં તમેવ શ્રયન્ ।
ધર્મ્યે વર્ત્મનિ વીરરાઘવકવિર્વાઞ્છન્ શુભં વર્તનં
તત્તઃ પ્રાર્થિતવાનથાસ્ય પઠિતાપ્યસ્ત્વેતદીક્ષાપદમ્ ॥ ૧૮૯॥

અધમર્ણપ્રાર્થના

શ્રીકાન્ત શ્રિતસર્વલોકશરણ શ્રેયોનિધે શાશ્વત
સ્વાધીનાખિલ શાન્ત વત્સલ શુભપ્રજ્ઞાનશક્ત્યુજ્જ્વલ ।
દેવાધીશ વૃષાચલેશ્વર દૃઢં ત્વત્પાદપદ્મપ્રિયઃ
ત્વદ્ભૃત્યસ્તવ કિઙ્કરોઽસ્મિ કિમિતિ પ્રાપ્તોઽસ્મિ કષ્ટાં દશામ્ ॥ ૧૯૦॥

વેદો માનમશેષતસ્સ ભગવાંસ્ત્વં દૈવતં કેશવઃ
માન્યાઃ વ્યાસપરાશરાદિમુનયો નિષ્કમ્પનિર્ધારકાઃ ।
સત્યેવં વૃષશૈલશેખર કથં ત્વત્પાદપદ્મદ્વયીમ્
આશ્રિત્યાપિ જનોઽયમિત્થમધુના કષ્ટસ્ય કાષ્ટાં ગતઃ ॥ ૧૯૧॥

ઉદ્દિશ્યાઙ્ઘ્રિમુદાર તે યદિ ભવેદેકોઽભિનીતોઽઞ્જલિઃ
કેનાપ્યચ્યુત કૃત્સ્નમસ્ય વૃજિનં મુષ્ણાસિ પુષ્ણાસિ શમ્ ।
તત્તાદૃક્પ્રથપદ્મવાસરસિકાલઙ્કારવક્ષસ્સ્થલ
પ્રાજ્ઞૈરિત્થમુદીરિતોઽસિ તદિદં કાલે ત્વયા સ્મર્યતામ્ ॥ ૧૯૨॥

કાલોઽયં કલિરત્ર કલ્પિતમભૂજ્જન્મ ત્વયેદં તુ નઃ
તસ્માદસ્મદિહાસ્તિ કર્મ નતરાં ભૂયઃ પ્રતીક્ષ્યં ત્વયા ।
કામં મોક્ષપથસ્સ માસ્તુ સકલં ત્વન્યત્તદેકોદ્ભવં
તત્કિં નામનિ વેઙ્કટેશ ફણિતોઽપ્યેવં ન સન્તુષ્યસિ ॥ ૧૯૩॥

નાહં સંસૃતિસાગરાન્તરમહાવર્તભ્રમં પ્રાર્થયે

નો વા ત્વામપહાય દભ્રચિદનુસ્વાદક્ષણં કામયે ।
નો વા સમ્પ્રતિ રઙ્ગલક્ષ્મણમુનિન્યસ્તાત્મરક્ષાભરઃ
ત્વત્તસ્ત્વત્પદપદ્મસેવનમહાનન્દઞ્ચ યાચે સ્વયમ્ ॥ ૧૯૪॥

શ્રીમન્નઞ્જનશૈલશેખર હરે સ્વામિન્નિદં શિષ્યતે
યત્તે પાદપયોજસેવનમિહાઽઽદેહાવસાનેપ્સિતમ્ ।
તત્તુભ્યં મયકા મદીયકયુજા નિર્વર્તય ત્વં સ્વયં
દૂરીકૃત્ય ભયં દયાજલનિધે દોષૈકરાશેર્મમ ॥ ૧૯૫॥

ઉત્પાદ્ય સ્વયમુત્તમે ખલુ કુલે વિદ્યાસુ યુક્તાસ્વપિ
વ્યત્પાદ્યાદ્ભુતદેશિકાઙ્ઘ્રિકમલાત્સમ્પાદ્ય યત્સામ્પ્રતમ્ ।
વાત્સલ્યેન વૃષાચલેશ નયતો વર્ત્મ સ્વયં સાધુ મામ્
અન્તે હન્ત કથં નુ ઘોરવૃજિનારણ્યે વિસર્ગે મતિઃ ॥ ૧૯૬॥

સ્થાતું યુક્તમસંશયં સમધિયા માનાવમાનદ્વયે
નૈવાથાપિ નિદેશલઙ્ઘનકૃતં સહ્યં સતાં ગર્હણમ્ ।
આજ્ઞાપાલનતત્પરસ્ય યદિ મે કામો ન સઙ્કલ્પ્યતે
પદ્માકાન્ત સુપુત્રહાનિવિહિતશ્શોકો ભવન્તં દહેત્ ॥ ૧૯૭॥

હા હા હન્ત મુકુન્દ હાસ્યતિ કદા ચિન્તાજ્વરો માનસં
સર્વોપ્યેષ વૃથૈવ યાતિ સમયો દાસ્યેઽપિ તિષ્ઠાસતઃ ।
આકર્ષન્તિ યથાયથં ન ચ પરીહારે મનાક્ પ્રાભવં
નાથ ત્વાં શરણં ગતસ્ય ઋણિતા શ્રીકાન્ત નૈવોચિતા ॥ ૧૯૮॥

અદ્ય શ્વસ્તદનન્તરે દિવસ ઇત્યેવં મૃષાભાષિતૈઃ
અર્થાપેક્ષિણમુત્તમર્ણનિવહં નિત્યં હરે વઞ્ચયન્ ।
સર્વં નારકમઞ્જનાદ્રિશિખરાલઙ્કાર ચેત્પ્રાપ્નુયાં
ત્વત્કીર્તિર્મમ દાસ્યવૃત્તિરપિ હા નૂનં લયં યાસ્યતઃ ॥ ૧૯૯॥

શ્રીમન્નીદૃશસાધુવર્ત્મનયનપ્રાપ્તં યશસ્તે સ્થિરં
કર્તું કિઞ્ચ મમાપિ જન્મ સફલીકર્તું વ્યવસ્યન્નિહ ।
દાસે દેવ દયાતરઙ્ગિતશુભાપાઙ્ગાલ્પવિક્ષેપતઃ
ક્ષિપ્રં સર્વમૃણં વિધૂય મમ દેહ્યત્યન્તદાસ્યં ત્વયિ ॥ ૨૦૦॥

ઇત્થં વેઙ્કટશૈલશ ૃઙ્ગનિલયં સર્વાર્થવિશ્રાણનં
શ્રીમન્તં હરિચન્દનં કુલધનં દેવં પરં સંશ્રયન્ ।
પ્રેમોદ્દારકષાયિતેન મનસા કૈઙ્કર્યવિઘ્નક્ષયં

કાઞ્ચન્નસ્તુત વીરરાઘવકવિઃ ક્ષેમાય દેવોઽસ્તુ સઃ ॥ ૨૦૧॥

પાણિમુદ્રાસ્તવઃ

પાર્થં પુરા પ્રણયતઃ પુરતો નિષાદ્ય
પદ્યં યદુત્તમરહસ્યમસાવગાસીઃ ।
સંસેવ્ય વેઙ્કટપતેઽત્ર તદર્થદર્શિ
હસ્તેઙ્ગિતં તવ કિમપ્યભિધિત્સુરસ્મિ ॥ ૨૦૨॥

વાચામગોચરમનન્ત પદાબ્જયોસ્તે
વેદેષુ વૈભવમશક્તતમેષુ વક્ત્રુમ્ ।
કા નામ માદૃશમહાજડદુષ્ટવાચામ્
કાર્યે વૃષાચલપતેઽત્ર કથા પ્રવૃત્તૌ ॥ ૨૦૩॥

આશાવશેન બહુધા વિરચય્ય કર્મા-
પ્યાશાધિપા મકલેષુ મતઙ્ગજેષુ ।
ન્યસ્તાસના ઇહ પતન્તિ જનાઃ ફલં તત્
નિત્યં લભધ્વમિતિ વક્ષિ કરેણ કિં ત્વમ્ ॥ ૨૦૪॥

દિવ્યસ્સમસ્ત્યકૃતકસ્તમસઃ પરસ્તા-
દન્યસ્સ કશ્ચિદિતિ કિન્નુ મુધાઽભિમત્યા ।
ભક્તૈઃ પ્રપત્તૃભિરપિ ત્વપુનર્ગતીદં
પ્રાપ્યં પરમ્ પદમિતિ પ્રણયિન્ બ્રવીષિ ॥ ૨૦૫॥

ક્ષેત્રં મહિષ્ઠમિદમાદિવરાહદેવ
કારુણ્યકન્દલકટાક્ષવિનષ્ટકષ્ટમ્ ।
દત્તે ત્રિવર્ગમપવર્ગમપીહ તસ્માત્ ।
વસ્તવ્યમિત્યુપદિશસ્યુચિતં રમેશ ॥ ૨૦૬॥

આરુહ્ય સપ્ત તવ સેવનકાઙ્ક્ષયાઽદ્રીન્
આગચ્છતઃ કરુણયા કમલેશ પશ્યન્ ।
અત્રૈવ તિષ્ઠત મદદ્ભુતદિવ્યરૂપ-
દૃષ્ટિપ્રનષ્ટદુરિતા ઇતિ કિં બ્રવીષિ ॥ ૨૦૭॥

કાકાસુરેણ કૃતઘોરવિચેષ્ટિતેન
કાલે જગત્રયપરિભ્રમણં વિધાય ।

યસ્મિન્પદે નિપતિતં શરણાર્થિના પ્રાક્
એતત્તદાશ્રયત શ્રીઘ્રમિતિ બ્રવીષિ ॥ ૨૦૮॥

સન્તિ પ્રલોભનપરાઃ ફલમલ્પમેવ
દક્ષાઃ પ્રદાતુમધરોત્તરમાશુ દેવાઃ ।
સર્વત્ર તત્ર ભવિનાં ન સુખાવકાશઃ
તન્મે પદં શરણમાશ્રયતેતિ વક્ષિ ॥ ૨૦૯॥

યે નામ કેચન ભવાદૃશવાઞ્છિતાર્થ-
દોહપ્રભાવભરિતાઃ પ્રથિતાસ્ત્રિલોક્યામ્ ।
તેષ્વેતદઙ્ઘ્રિસરસીરુહપૂજનેન
પ્રાપ્તાઃ પ્રભુત્વમિતિ કિન્નુ હરિ બ્રવીષિ ॥ ૨૦૯॥

કામં ભવેદ્વિવિધનશ્વરપૂરુષાર્થ-
લિપ્સાકુલં પરવશં લલિતં મનો વઃ ।
તત્તાદૃશં સકલમપ્યધિકં લભેધ્વ-
મેતત્પદામ્બુજમુપાય ઇતિ બ્રવીષિ ॥ ૨૧૦॥

અર્થ્યં ફલં સકલમપ્યચિરેણ દાતુમ્
અર્ચામિમામુપગતોઽસ્મિ દયૈકરૂપામ્ ।
કર્તવ્યમપ્યતિલઘુ પ્રણિપાતરૂપ-
મેતત્પદાબ્જ ઇતિ દેવ હિતં બ્રવીષિ ॥ ૨૧૧॥

વ્યાજેન કેનચિદશેષમપીશ્વર ત્વ-
માનાધ્ય લોકમનુકમ્પિકટાક્ષિતસ્સન્ ।
અન્યદ્વિમુઞ્ચત્ ફલં સકલં ફલં વઃ
પાદાબ્જમેવ મમ નિત્યમિતિ બ્રવીષિ ॥ ૨૧૨॥

દેવી દયેવ દયિતા હૃદયં શ્રિતા સા
નિત્યાશ્ચ કેચન શુભાયુધભૂષણાદ્યૈઃ ।
રૂપૈર્યથોચિતમવાપ્તમદઙ્ગભાગાઃ
તદ્વઃ કૃતે પદમિદન્ત્વિતિ વક્ષિ સદ્ભ્યઃ ॥ ૨૧૩॥

મા નામ ભૂદ્ભયમુપાશ્રયતાં મનાગ-
પ્યહ્નાય તે સ્વયમિદં મમ પાદપદ્મમ્ ।
યેં વો ભયાનકમતાઃ મમ હેતિભીતાઃ
પ્રાપ્સ્યન્તિ જીવિતુમિતિ પ્રથયસ્યનન્ત ॥ ૨૧૪॥

કામૈકભોગવિવશાંસ્ત્રિદશાનુપેત્ય
 તેષાં પશૂભવિતુમિચ્છથ હન્ત કસ્માત્ ।
તસ્માદ્વરં વિવિધસઞ્ચરણાર્હભૂમા-
 વત્રૈવ વસ્તુમિતિ બોધયસિ પ્રભો ત્વમ્ ॥ ૨૧૫॥

આરાધનેષુ વિવિધેષ્વધિવેદમુક્તે-
 ષ્વેતત્પદાબ્જયજનં પરમસ્તિ સન્તઃ ।
આરાધનં પરતરન્ત્વિદમાશ્રિતાના-
 મિત્યાદરેણ વૃષશૈલમણે બ્રવીષિ ॥ ૨૧૬॥

એષા વિભૂતિરિયતીદમુપર્યસૌ મે
 નિત્યા ત્રિપાદિતિ કરેણ પરેણ ચોક્ત્વા ।
બમ્ભ્રમ્યમાણમિહ ભવ્યજગન્મય ત્વં
 લોકં નિનીષુરવલોકયસે પદં તે ॥ ૨૧૭॥

અત્યુચ્છ્રિતઃ પરિત એષ ધરાધરેન્દ્રઃ
 પાદેન પશ્યત મયૈવમધઃકૃતોઽત્ર ।
ઇત્થં મવદ્વૃજિનરાશિમધો વિદધ્યા-
 માતઃ પદં પ્રણમતેતિ વદસ્યનન્ત ॥ ૨૧૮॥

ગૃહ્ણન્તિ યેઽત્ર કુસુમાનિ કૃતેષુ સાક્ષા-
 દભ્યર્ચનેષુ ચરણૈરમરાઃ મહાન્તઃ ।
ક્ષિમાનિ તેત્વિહ વહન્તિ શિરોભિરેતા-
 ન્યર્ચ્ચ્ય પદં તદિદમિત્યધિદેવ વક્ષિ ॥ ૨૧૯॥

ત્રૈવિક્રમશ્ચરણ એષ જગદ્વ્યધાત્પ્રાક્
 વજ્રાતપત્રમુખચિહ્નવિશિષ્ટશોભમ્ ।
એકાતપત્રવહવજ્રધરાદિભાવ-
 લિપ્સા યદિ પ્રણમતેતિ વદસ્યનન્ત ॥ ૨૨૦॥

સ્થાનાત્સુદૂરમવતીર્ણવતસ્તતસ્તે
 જઙ્ઘાન્તપાદયુગલશ્રમયાપનાય ।
ભક્તાન્નિયોજયસિ યસ્ય તવાદ્ભુતસ્ય
 પ્રેક્ષાલવપ્રશમિતશ્રમ એષ લોકઃ ॥ ૨૨૧॥

ભક્તવ્રજં વૃષગિરીન્દ્ર વિમોહનં ત્વાં

સ્ત્રીભાવતસ્ત્વનુબુભૂષુમનુગ્રહીતુમ્ ।
પ્રાઙ્મૈથિલીપરિણયાત્કૃતગૌતમસ્ત્રી-
રૂપં દૃષદ્ઘમલ લમ્ભયસેઽઙ્ઘ્રિરેણુમ્ ॥ ૨૨૨॥

સા પાદુકાપિ પદપઙ્કજધારનાત્પ્રાક્
સાકેતરાજપદમુત્તમમધ્યતિષ્ઠત્ ।
તસ્માદિદં શિરસિ ધારયતાં કરસ્થઃ
ક્ષેમસ્સયોગ ઇતિ વક્ષિ વૃષાચલેન્દ્ર ॥ ૨૨૩॥

મદ્દિવ્યશાખચરણૈકપરાયણત્વા
ચ્છાખેતિ વીક્ષ્ય ચરણેત્યપિ ચ પ્રસિધ્દિમ્ ।
વેદસ્સ માં ગિરિવપુર્વહતીહ ભક્ત્યે-
ત્યેવં સુપર્ણગિરિશૃઙ્ગમણે બ્રવીષિ ॥ ૨૨૪॥

સત્યાદિલોકનિલયાંસ્તવ સેવનાર્થે
વૈકુણ્ઠલોકગમનોદ્યમિનસ્સુરાન્ત્વમ્ ।
અત્રાગતોઽસ્મિ વૃષશૈલ ઇતિ બ્રવાણો
વિત્રાસિતાસુર સમાહ્વયસીતિ મન્યે ॥ ૨૨૫॥

જ્ઞાનાત્મકે ચ ભુવને જલધેશ્ચ મધ્યે
માન્યેષુ તે નિગમરાજશિરસ્સુ નિત્યમ્ ।
તુલ્યમ્ શ્રિયઃકમન નિસ્સ્વપરાર્થબુદ્ધિ-
ષ્વપ્યાવિભાતમુપદર્શયસેઽઙ્ઘ્રિપદ્મમ્ ॥ ૨૨૬॥

સંસારવારિધિરયં ભવતામગાધો
જઙ્ઘામિતં જલમિવાસ્તિ સુખેન લન્ધ્યઃ ।
મત્પાદપદ્મયુગલપ્રણિપાતમાત્રા-
દિત્યાદરેણ વદસીવ વૃષાદ્રિનાથ ॥ ૨૨૭॥

એવંવિધાનિ વિવિધાનિ વિબોધયંસ્ત્વં
વિશ્વં જનં નિજપદામ્બુજસેવનેન ।
ધન્યં તનોષિ દયયા વૃષશૈલશૃઙ્ગે
નિત્યં સ્થિતોઽત્ર નિરપાયરમાનિવાસ ॥ ૨૨૮॥

ઇતિ પાણિમુદ્રાસ્તવઃ

નાથ શ્રિયો નળિનસુન્દરમાશ્રયંસ્તે
    પાદં પવિત્રમપનીતસમસ્તખેદઃ ।
સાર્વજ્ઞ્યરમ્યસકલાદ્ભુતશેષવૃત્તિ-
    ધન્યો બુભૂષતિ દયામ્બુનિધે મમાઽઽત્મા ॥ ૨૨૯ ॥

નાથસ્સ એષ નરકચ્છિદપારશક્તિ-
    ર્નાકસ્ય પૃષ્ઠ ઇવ નઃ પ્રકટે પ્રકૃષ્ટે ।
નારાયણાચલ ઇહ સ્વયમાવરાત્મા
    ભૂમા રમાસહચરઃ સ્વગુણૈસ્સમિન્ધે ॥ ૨૩૦ ॥

એષ શ્રિયા સહ હરિશ્શુભદિવ્યમૂર્તિ-
    શ્શ્રેયો જનસ્ય સકલસ્ય વિધિત્સુરસ્મિન્ ।
શેષાચલે જયતિ વેઙ્કટનાથનામા
    કિં ભો જનાસ્તદિતરત્ર ભજધ્વમેનમ્ ॥ ૨૩૧ ॥

યે નામ કેચન રમેશ સમેશ કર્મ-
    વૈચિત્ર્યતઃ કલિતબાહ્યકુદૃષ્ટિપક્ષાઃ ।
તેપિ ત્વદીયમનઘં વિભવં સમીક્ષ્ય
    વશ્યા ભવન્તિ તવ કસ્સદૃશસ્તતોઽસ્તુ ॥ ૨૩૨ ॥

ત્વામદ્વિતીયમખિલાશ્શ્રુતયો ગૃણન્તિ
    શ્રીમન્ સદૈવ રમયાપિ ચ સદ્વિતીયમ્ ।
ત્વદ્ભૂમદર્શનસુખામ્બુનિધૌ નિમગ્નાઃ
    નૈવાન્યદમ્બુજવિલોચન લોકયન્તિ ॥ ૨૩૩ ॥

હા હા કિમેતદધરોત્તરમદ્ય લોક-
    સ્સઞ્ચેષ્ટમાન ઇતિ સાત્ત્વિકસઙ્ઘવાદઃ ।
સર્વજ્ઞ ભાવિ પરિશીલયતઃ કલૌ તે
    સાધુત્વબુધ્દિરિહ ચેત ન રમેશ ભીર્મે ॥ ૨૩૪ ॥

શક્તિસ્તવાસ્ત્યનવધિર્હિ યથા તથૈવ
    શ્રીકાન્ત સન્ત્યનવધીનિ મમાપ્યઘાનિ ।
સર્વાધિકસ્ય તવ સામ્યમિદં ન યુક્તં
    તત્ત્વં વિચિન્ત્ય દયયોચિતમત્ર કુર્યાઃ ॥ ૨૩૫ ॥

આમઞ્જુનૂપુરમહામકુટં ભવન્તમ્
આસ્થાપરેણ મનસા ચ દૃશા વિલોક્ય ।
આનન્દસાગરનિમજ્જનભાગ્યધન્યાઃ
માન્યાઃ શ્રિયઃ કમન સન્તુ મયિ પ્રસન્નાઃ ॥ ૨૩૬॥

સા સર્વલોકજનની સકલાર્તિહન્ત્રી
સામાદિભિસ્ત્વયિ દયામભિવર્ધયન્તી
ત્વય્યેકતામુપગતા લસતીહ યૈષા
ત્વઞ્ચ શ્રિયો નિલય નશ્શરણં ભવેતમ્ ॥ ૨૩૭॥

સર્વાન્તરાત્મભવનં સકલેષુ તુલ્યાં
વૃત્તિં સદૈવ રમયાપિ ચ સાહિતીં તે ।
નારાયણાચલનિવાસરતાભિયુક્તાઃ
સમ્યગ્વિભાવ્ય સમમેવ ભવન્તમાહુઃ ॥ ૨૩૮॥

તદ્ધામ દિવ્યમનઘં તપસાપ્યગમ્યં
સઙ્કલ્પિતં હિ ભવતા ન મમાત્ર ખેદઃ ।
યત્ ત્વાં તથૈવ રમયાદ્ય વૃષદ્રિશ૾ૃઙ્ગે
પશ્યામિ સાદરમશેષસમન્વિતોઽહમ્ ॥ ૨૩૯॥

આસેતુબન્ધહિમશૈલમનન્તભેદાઃ
લોકા ભવન્તમનપાયદયાનિધાનમ્ ।
આનમ્રવાઞ્છિતવિધાનપરાવતાર-
મારાધયન્તિ રમયા સહિતં સ્વશક્ત્યા ॥ ૨૪૦॥

અમ્ભોજનેત્રમપહાય રમાસહાયં
કં ભો જનાઃ ભજથ હન્ત વૃથા વિમુગ્ધાઃ ।
સર્વેષ્ટદસ્સકલદેવપતિસ્સ એષ
શેષાચલે વિહરતીહ હિ વો હિતાય ॥ ૨૪૧॥

વિશ્વસ્ય યાચતુ ફલં તદિહેતિ બુધ્યા
વિશ્વસ્ય વિશ્વમિહલોકફલં દુહાનઃ ।
ત્વલ્લબ્ધભૂતિવિધિશમ્ભુમુખાન્યદેવ-
સેવારતિં શમયસીવ વૃષાદ્રિવાસિન્ ॥ ૨૪૨॥

વૈકુણ્ઠતો વૃષગિરિં સ્વયમચ્યુત ત્વામ્
આનીય તેઽઙ્ઘ્રિયુગમાશ્રયિતું જનૌઘમ્ ।

યા પ્રેરયત્યધ ઇતોપ્યવતીર્ય તસ્યાઃ
    પ્રીત્યૈ શ્રિયો મયિ નિધેહિ દયાર્દ્રદૃષ્ટિમ્ ॥ ૨૪૩॥

દિવ્યે પ્લવે વિવિધવૈદ્યુતદીપરત્ન-
    ભવ્યે ભવન્તમિહ સમ્પ્રતિ પુષ્કરિણ્યામ્ ।
શ્રીશૈલનાથ સહિતં રમયા ચ ભૂમ્યા
    દાસસ્સમીક્ષ્ય ચ વિનસ્ય ચ ધન્ય એષઃ ॥ ૨૪૪॥

સુસ્નિગ્ધવૃત્તરુચિરસ્ફટિકાવદાત-
    સ્થૂણોપશોભિનિ વિચિત્રવિમાનમાન્યે ।
વિભ્રાજમાનશુભવૈદ્યુતદીપઙ્ક્તૌ
    સ્વજ્યોતિષા પ્લવ ઇહાઽદ્રિપતે વિભાસિ ॥ ૨૪૫॥

શ્રીમન્ વૃષાચલવરાગ્ચલવલ્લભ ત્વા-
    માશ્રિત્ય સન્તતભવત્પદપદ્મસક્તઃ ।
પાપાદપાયનિચયાન્નિરયાચ્ચ સમ્ય-
    ગાત્માનમાત્મજનમપ્યવિતું પ્રયાચે ॥ ૨૪૬॥

સર્વજ્ઞ તે ન વિદિતં કિમિદં મનો ગે
    સર્વેષુ શક્ત ન કુતસ્સ્તવને નિયોજયે ।
મુક્તાદિનેવ કિમિતોઽસ્તિ મયા ફલં તે
    બદ્ધો યદસ્મિ ભગવન્ સ પરસ્સમાધિઃ ॥ ૨૪૭॥

આશાવશાદ્વૃષગિરીશ તથાનુરૂપ્યાત્
    અજ્ઞાતશક્તિરહમીડિતુમધ્યવસ્યન્ ।
અન્યત્ર કાલમખિલં સરસં ક્ષિપન્ યત્
    ત્વાં પ્રસ્મરામિ તદિદં ભગવન્ ક્ષમસ્વ ॥ ૨૪૮॥

ગીતોપદેશનિરતઃ પવનાત્મજાત-
    કેતોઃ પૃથાતનુભુવો રણદેશમધ્યે ।
વ્યાખ્યાઙ્કશોભિકરપદ્મદલસ્સ નૂનં
    ગોવિન્દરાજ ઇહ વેઙ્કટવલ્લભ ત્વમ્ ॥ ૨૪૯॥

ત્વય્યેવ મે મતિરિયં નિયતા વિભાતુ
    ત્વત્પાદપઙ્કજધનેન ચ ધન્યતા સ્યાત્ ।
ત્વત્સુન્દરાઙ્ગપરિચિન્તનલબ્ધભૂમા
    ત્વત્કિઙ્કરઃ કમલલોચન વર્તિષીય ॥ ૨૫૦॥

શ્રીવેઙ્કટાદ્રિસદૃશં ન હિ કિઞ્ચિદસ્તિ
શ્રીવેઙ્કટેશસદૃશો ન ચ જાતુ કશ્ચિત્ ।
તત્પાદપઙ્કજપરાગપવિત્રિતેન
દેહેન તત્પરિસરે સુકૃતી ભવાનિ ॥ ૨૫૧॥

વજ્રાયુધાદિવિબુધવ્રજવન્દ્યમાનં
વજ્રૈકભૂષણવિભૂષિતમુજ્જ્વલમ્ ત્વામ્ ।
વજ્રાત્કઠોરતરમપ્યતિમૂર્ખચિત્ત-
માશુ દ્રવં રચયિતું પ્રભુમાશ્રિતોઽસ્મિ ॥ ૨૫૨॥

કિં નામ ચિન્તયસિ દાસજને ન જાને
દેહાન્તકાલપરમાવધિ કાર્યમત્ર ।
શાસ્ત્રશ્રમેણ વિકલઃ કુત એવ ભક્તઃ
પ્રત્યક્ષિતં સ્વપરમ્ભાવિ કુતસ્તરાં સ્યાત્ ॥ ૨૫૩॥

આલોડિતાનિ નિખિલાન્યપિ યૈસ્તુ શાસ્ત્રા-
ણ્યાચાર્યતલ્લજમુખૈરવધારિતં ત્વામ્ ।
નારાયણ શ્રિતવૃષાચલતુઙ્ગશૃઙ્ગં
નાથં નમામિ નલિનાક્ષમુદારમાઢ્યમ્ ॥ ૨૫૪॥

પાદારવિન્દયુગલે બલવન્મનો મે
નિક્ષિપ્તમચ્યુત નિરસ્તસમસ્તદોષે ।
તત્રૈવ મઞ્જુલમનોહરદિવ્યરુક્મ-
મઞ્જીરશોભિનિ મધુસ્વદનં વિધત્તે ॥ ૨૫૫॥

નાથ શ્રિયો નયનયોર્યુગલં મદીયં
નિશ્શેષમઙ્ગલનિધિં નિધિમાશ્રિતાનામ્ ।
આપાદચૂડમનુભૂય ભવન્તમેતિ
સાહસ્રનેત્રમુખસેવિત નૈવ તૃપ્તિમ્ ॥ ૨૫૬॥

રૌક્મેણ ભવ્યમહસા મકુટેન માન્યં
ચક્રેણ તે કમલલોચન કમ્બુના ચ ।
નિત્યં શ્રિયા વિહિતશોભભુજાન્તરાલં
રૂપં પ્રભો વૃષગિરીશ વિભાતુ ચિત્તે ॥ ૨૫૭॥

સા મે સમસ્તજગતીભમાગ્યભૂમા

કામાતિશાયિકમનીયગુણાભિરામા ।
શ્યામા રમારમણ દિવ્યસુવર્ણદામા
ક્ષેમાય મૂર્તિરિયમસ્તુ વૃષાદ્રિધામા ॥ ૨૫૮॥

સિંહાચલેશ્વર દિશો વિદિશશ્ચ દેવ-
સિંહં સમાશ્રયિતુમેત્ય જના ભવન્તમ્ ।
સિંહાદ્ભયાદિવ ભૃગૈર્વૃજિનૈર્વિમુક્તાઃ
સિંહાસનેષુ મહિતેષુ સુખં જયન્તિ ॥ ૨૫૯॥

નાગા હિ રત્નશિરસોઽર્થપરાયણાસ્તે
નાગેશપર્વતનિવાસ તથાઽવનિસ્થાઃ ।
ધર્મે રતા દિવિભવા અપિ કાયમગ્નાઃ
ત્રૈવર્ગિકેતરદિમાં ગમય ત્રિલોકીમ્ ॥ ૨૬૦॥

મધ્યેઽવનેરિહ તથા પયસાં નિધાને
વ્યોમન્યપેતતમસિ સ્ફુટરશ્મિબિમ્બે ।
નિત્યં વિભાન્તમનઘં મરુતામધીશં
ત્વાં સર્વભૂતનિલયં કલયેઽઞ્જનેશ ॥ ૨૬૧॥

વેઙ્કટમહીધ્રવરશેખરમિહ ત્વાં
યાચતિ યદેષ ઇદમસ્તિ ન ન યુક્તમ્ ।
દીન ઇહ નિર્ગતિરલબ્ધફલ એષ
ત્વં તુ વિભુરદ્ભુતમહાગુણનિધિશ્ચ ॥ ૨૬૨॥

વેઙ્કટાધીશ તે વૈભવં કિંવિધં
કેન વા શક્યતે જ્ઞાતુમત્યદ્ભુતમ્ ।
ક્ષેમભાજં જનં માં ભવાન્ ભૂયસા
વીક્ષિતેન સ્વયં દેવ નિત્યં કુરુ ॥ ૨૬૩॥

દયાસિન્ધુઃ શ્રીમાન્ દલિતનિખિલારાતિરધિકં
શ્રિયં નઃ પુષ્ણન્ યશ્શરણમસિ કૃત્સ્નસ્ય જગતઃ ।
પ્રભુત્વં સૌલભ્યં પરમપુરુષત્વં તવ હરે
કદા વા કો વા સ્યાદ્વદિતુમિહ શક્તઃ કિયદપિ ॥ ૨૬૪॥

અસામાન્યં માન્યં હ્યતિવચનસૌલભ્યમધુરં
પ્રભુત્વં શ્લાઘન્તે પરમપુરુષ બ્રહ્મનિરતાઃ ।
અલીકસ્તોત્રાણામવિષયમનન્તાદ્ભુતગુણં

તદેકસ્થાનં ત્વાં વૃષગિરિપતે યામિ શરણમ્ ॥ ૨૬૫॥

અસ્માદૃશામયમનારતદુષ્કૃતાનામ્
અવ્યાજવત્સલતયા શમિતાઽઽજનસ્સન્ ।
શેષાચલેશ ભગવન્ ભવસિન્ધુપોતઃ
પારે પરત્ર તનુષે પરમં ચ સામ્યમ્ ॥ ૨૬૬॥

પ્રપદ્યેઽહં સદ્યઃ પદયુગમવિદ્યૈકનિલયો
નિષદ્યા દોષાણાં નિરવધિગુણગ્રામમનઘમ્ ।
મૃગેન્દ્રક્ષોણિભૃન્મહિતશિખરોદ્યાનવિહૃતિ-
પ્રિયશ્રીવૈવશ્યક્ષતદુરિતદૃષ્ટેસ્તવ હરે ॥ ૨૬૭॥

સૂરીન્દ્રા અપિ નાથયામુનમુનિશ્રીપૂર્ણરામાનુજ-
શ્રુત્યન્તાર્યમુખાસ્તથા મમ ગુરુસ્ત્રય્યન્તરામાનુજઃ ।
શિષ્યસ્તસ્ય ચ રઙ્ગલક્ષ્મણમુનિર્યં શ્રીનિધિં સંશ્રિતાઃ
સોઽયં સર્વગુરુસ્તુતોઽસ્તુ નિયતં શ્રેયઃપ્રદો નઃ પ્રભુઃ ॥ ૨૬૭॥

યદાયત્તં વિશ્વં યદુપરિ ન કિઞ્ચિત્ યત ઇદં
નિલીનં યત્રેદં યદિદમિતિ ચામ્નાયવિદિતમ્ ।
ભજે તન્નિર્દોષં નિરવધિકનિસ્સઙ્ખ્યવિભવં
પ્રબુદ્ધૈરારાધ્યં પ્રપદનવશં શ્રીશ્રિયમિહ ॥ ૨૬૮॥

મનો મે મા કિઞ્ચન્મધુમથન મૃદ્નાતુ મદનો
મૃડે વાઽન્યસ્મિન્ વા મમ ભવતુ મા રક્ષકમતિઃ ।
અશેષેશે શેષાચલનિલયિનિ શ્રીપરિબૃઢે
મુકુન્દે ભાવો મે ભવતુ મુનિલોકૈકસુગમઃ ॥ ૨૬૯॥

મહત્યાનન્દેઽસ્મિન્મહિતગુણસિન્ધૌ સ્ફુરતિ તં
વિહાયાયં લોકઃ કિમિતિ વિષયે હન્ત સજતિ ।
ક્ષુધશ્ચોદન્યાયાઃ પ્રશમનમિમં ધ્યાયત જનાઃ
શરીરે જીર્ણેઽસ્મિન્નહિ ભવતિ તાતો ન જનની ॥ ૨૭૦॥

ત્વયિ સતિ ખગરાજક્ષ્માધરાધીશ લક્ષ્મી-
પરીબૃઢ સકલન્નઃ ક્ષેમમાતન્વતિ દ્રાક્ ।
કિમિતિ કલયતીદં માનસં ત્વદ્વિભિન્નં
ભવસિ ચ પરમસ્ત્વં પ્રાપકસ્સન્ ફલઞ્ચ ॥ ૨૭૧॥

નિયન્ત્રા વ્યાપ્તં યન્નિખિલમપિ લોકેષુ ભવતા
તદેષ સ્વાચ્છન્દ્યં વિજહદિહ જીવો નિયતધીઃ ।
ઉપેક્ષ્યૈતદ્વાહ્યં નિપુણમથ સર્વાન્તરમિમં
ભવન્તં ભુઞ્જીત શ્રિતરમ દુરાશાવિરહિતઃ ॥ ૨૭૨॥

તત્તદ્વર્ણાશ્રમસમુચિતં કર્મ યસ્સાત્વિકસ્સન્
યાવજ્જીવં ત્વયિ ભગવતિ શ્રીશ ભક્તો વિદધ્યાત્ ।
અર્વાચીનૈર્ન ખલુ સ પુમાન્ લિપ્યતે લબ્ધશેષ-
પ્રખ્યક્ષોણીધરશિખરસંવાસ કારુણ્યતસ્તે ॥ ૨૭૩॥

પાદામ્ભોજયુગે પ્રણમ્ય નિહિતં જઙ્ઘાગતં માનસં
જાનુદ્વન્દ્વમુપેયિવત્ પરિગતશ્રેષ્ઠોરુ લબ્ધ્વા કટિમ્ ।
વક્ષઃ શ્રીમણિશોભિ સંશ્રિતમથો લોલં ભુજેષુ ક્રમા-
દ્વક્ત્રાબ્જં સમવાપ્ય કૃત્સ્નમચિરાદાલમ્બતે શ્રીપતે ॥ ૨૭૪॥

ઇત્થં નિસ્તુલતીર્થસમશિખરિપ્રખ્યાતશ‍ૃઙ્ગાટવી-
કુઞ્જૈકાન્તરમાવિહારપરમાનન્દં પરં પૂરુષમ્ ।
શ્રીવત્સાન્વયવીરરાઘવકવિઃ કાલેષુ યૈર્ભક્તિમાન્
અસ્તૌષીદિહ તાનિ સઙ્કુલિતવાન્પદ્યાનિ સોઽયં સ્વયમ્ ॥ ૨૭૫॥

ઇતિ તર્કાર્ણવેન પણ્ડિતરત્નેન શિરોમણિના ઉત્તમૂર્તિ
વીરરાઘવાચાર્યેણ વિરચિતં શ્રીપદ્માવતીસ્તોત્રસહિતં
શ્રીવેઙ્કટેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શુભમસ્તુ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

shrIvenkaTeshastotram

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*